Acc 242

॥ प्रथमारोपत्वं नाम किं वस्त्वन्यत्र सत्त्वारोपः प्रथमारोपः ॥

यतीन्द्रमतदीपिका

तर्कत्वं नाम किं ॥ व्याप्यांगीकारेण व्यापकप्रसंजनं तर्कः

मत प्रथि[illegible] हं वा[illegible]
तं चेति चतुः षट् प्रद ॥ यह
चतुः षट् पद है ॥ और [illegible] अठारह दस पश्चि[illegible] रस जंघ
यह पंचतन्मात्रा है ॥ और पंच
महाभूत ॥ पृथिवी जल तेज वायु आकाश ॥
यह पंच महाभूत है ॥

२४ तत्त्व यह है ॥ प्रकृति महत्
अहंकार ॥ पंचतन्मात्रा ॥ पंचमहाभूत
[illegible] सब मिलकर के २४ तत्त्व होते है

॥ प्रमाणत्वं नाम माह ॥ प्रमाकरणं प्रमाणं ॥ प्रमीयते ति प्रम[illegible]
नैयायिकानां मते त्रीणि प्रमाणानि सन्ति ॥ प्रत्यक्षानुमानशाब्दाख्यानि ॥ वैयाकरणानां मते
त्रैवार्तिक भाष्यानि [illegible]

प्रमात्वं किं नाम ॥ प्रमा यथार्थानुभवः
यत्र यत्तदस्ति तत्र तस्य ज्ञानमिति [illegible]
यत्र तत्प्रकारकत्वं प्रमेति ॥

प्रमेयत्वं नाम किं ॥ प्रमाविषयत्वं
प्रमेयम् ॥

[illegible] करोड वा १० करोड योजन
[illegible] वाली कार संख्या

१ आनुकूल्यस्य संकल्पः प्रातिकूल्यस्य वर्जनं रक्षिष्यतीति विश्वासो गोप्तृत्ववरणं तथा। आत्मनिक्षेपकार्पण्ये षड्विधा शरणागतिः

श्रीमते रामानुजाय नमः श्रीवेंकटेशं करिशैलनाथं श्रीदेवराजं घटिकाद्रिसिंहं कृ
ष्णेन साकं यतिराजमीडे स्वप्ने च दृष्टान्मम देशिकेंद्रान् ॥१॥ यतीश्वरं प्रणम्याहं वेदांता दि१
र्यमहागुरुं ॥ करोमि बालबोधार्थं यतींद्रमतदीपिकां ॥२॥ श्रीमन्नारायण एव चिदचि
द्विशिष्टाद्वैततत्त्वं भक्तिप्रपत्तिभ्यां प्रसन्नः स एवोपायः अप्राकृतदेशविशिष्टः स
एव प्राप्य इति वेदांतवाक्यैः प्रतिपादयतां व्यासबोधायनगुहदेवभारुचिब्रह्मनंदिद्र
विडाचार्य श्रीपरांकुशनाथयामुनमुनियतीश्वरप्रभृतीनां मतानुसारेण बालबो
धार्थं वेदांतानुसारिणी यतींद्रमतदीपिकाख्या शारीरकपरिभाषा महाचार्यकृ
पाबलेन विना मया यथामति संग्रहेण प्रकाश्यते सर्वपदार्थजातं प्रमाणप्रमेयभे
देन द्विधा भिन्नं प्रमाणानि त्रीण्येव प्रमेयं द्विविधं द्रव्याद्रव्यभेदात् द्रव्यं द्विविधं जडमज
डमिति जडं च द्विधा प्रकृतिः कालश्चेति प्रकृतिश्चतुर्विंशतितत्त्वात्मिका कालस्तु १

१ अव्यक्तबुद्ध्यहंकारज्ञानकर्मेन्द्रियमनसैः सतन्मात्रमहाभूतैः परिकल्पितमादितः

स्पर्शरूपरसगंधसंयोगशक्तिमेदाद्देशैव एवमुद्दिष्टानामुद्देशक्रमेणलक्षणं परी
क्ष्यते तत्र प्रमाकरणं प्रमाणं प्रमाणलक्षणं प्रमाकरणत्वं लक्षणं यथावस्थि
तव्यवहारानुगुणं ज्ञानं प्रमा लक्षणं यथावस्थितव्यवहारानुगुणज्ञानत्वं लक्षणं ज्ञा
नं प्रमेत्युक्ते शुक्तिकायामिदं रजतमिति ज्ञानेऽतिव्याप्तिरत उक्तं व्यवहारानुगुण
मिति एवमपि तत्रैवातिव्याप्तिर्भ्रान्तिदशायामपीदं रजतमिति व्यवहारप्रमाणत्वादत
उक्तं यथावस्थितमिति यथावस्थितेति पदेन संशयान्यथाज्ञानविपरीतज्ञानव्यावृ
त्तिः धर्मिग्रहणे मिथो विरुद्धानेकविशेषस्मरणं संशयः यथोर्द्धता विशिष्टस्थाणुर्वा २
पुरुषो वेति ज्ञानं अन्यथाज्ञानं नाम धर्मविपर्यासः यथा कर्तृत्वेन भासमानेऽप्याल
निकुयुक्तिभिः कर्तृत्वस्य भ्रान्तत्वोपपादनं विपरीतज्ञानं नाम धर्मिविपर्यासः यथा

गवन्यस्मुमुक्षुर्द्विविधः कैवल्यपरो

पाधिभेदात् त्रिविधः अजडस्तु द्विविधं पराक् प्रत्यगिति अजडं पराक् पि तत्र्या नित्यविभू
तिः धर्मभूतज्ञानं चेति प्रत्यगपि द्विविधः जीवेश्वरभेदात् जीवस्त्रिविधः बद्धमुक्तनि
त्यभेदात् बद्धो द्विविधः बुभुक्षुमुमुक्षुभेदात् बुभुक्षुर्द्विविधः अर्थकामपरो मोक्षका
मपरश्चेति मोक्षपरो द्विविधः भक्तप्रपन्नश्चेति प्रपन्नो द्विविधः एकांतीपरमैकांती
चेति परमैकांती द्विविधः दृप्तार्तभेदात् पंचधावस्थित ईश्वरः परव्यूहविभवां
तर्याम्यर्चावतारभेदात् परस्त्वेकधा व्यूहश्चतुर्द्धा वासुदेवसंकर्षणप्रद्युम्नानि
रुद्धभेदात् केशवादिव्यूहांतरं मत्स्यादयो विभवाः पुनरनंता अंतर्यामी प्रतिशरी
रमवस्थितः अर्चावतारस्तु श्रीरंगवेंकटाद्रिहस्तिगिरियादवाद्रिघटिकाचलादि
षु सकलमनुजनयनविषयंतां गतो मूर्तिविशेषः अद्रव्यं तु सत्वरजस्तमः शब्द

मे२

हणोऽसविकल्पकं तु सप्रत्ययमर्थगुणसंस्थानादिविशिष्टमितीयादि पिंडज्ञानं उभयविधमपि
तद्विशिष्टविषयं चैव अविशिष्टग्राहिणो ज्ञानस्यानुपलंभादनुपपत्तेश्च ग्रहणप्रकार प्रकारा २
लु आत्मा मनसा संयुज्यते मन इंद्रियेणेंद्रियमर्थेनेंद्रियाणां प्राप्यकारित्वनियमात्
३ अतो घटादिरूपार्थस्य चक्षुरादिरूपेंद्रियस्य संनिकर्षे सति अयं घटः पट इति चाक्षुषज्ञानं जा
यते एवमेव स्पार्शनप्रत्यक्षादयोऽपि द्रव्यग्रहणे संयोगः संबंधः द्रव्यगतरूपादिग्रहणे स
३ मवायानंगीकारात्संयुक्ताश्रयणसंबंधः निर्विकल्पकसविकल्पकभिन्नं प्रत्यक्षं द्विवि मेद५
धं अर्वाचीनमनर्वाचीनं चेति अर्वाचीनं पुनर्द्विविधं इंद्रियसापेक्षं तदनपेक्षं चेति
तदनपेक्षं च द्विविधं स्वप्रसिद्धं दिव्यं चेति स्वप्नं सिद्धं योगजन्यं दिव्यं भगवत्प्रसाद
न जन्यं अर्वाचीनं तु इंद्रियानपेक्षं मुक्तनित्येश्वरज्ञानमनर्वाचीनं तु प्रसंगादुक्तं एवं
साक्षात्कारिप्रमाकरणं प्रत्यक्षमिति सिद्धं ननु यथावस्थितं व्यवहारानुगुणं ज्ञा २

मीमांसकानां मते यत्प्रमाणलक्षणं तन्निराकरोति अनधिगतेति एकस्मिन्नेव घटे घटोऽयं घटोऽयमिति धारावाहिकज्ञानानां
गृहीतग्राहित्वात् अप्रामाण्यप्रसंगादित्यादिप्रकारेण नैयायिकैरेव निरस्तत्वादिति भावः
वस्तुनो वस्तुत्वे तज्ज्ञानं लक्षणस्य त्रयो दोषाः संति अव्याप्ति अतिव्याप्त्यसंभवभेदात् ल
क्ष्यैकदेशे लक्षणस्यावर्त्तमानत्वमव्याप्तिः लक्ष्यादन्यत्र प्रवर्त्तमानत्वमतिव्याप्तिः लक्ष्ये क्वा
प्यविद्यमानत्वमसंभवः यथा जीवो गुणत्रयवत्त्व इत्युक्तेऽव्याप्तिः ज्ञानगुणक इत्युक्ते
ऽतिव्याप्तिः वस्तुविषयो जीव इत्युक्ते असंभव एवमत्रोक्तदूषणत्रयाभावात् प्रमा
णलक्षणं सुस्थं साधकतमं करणं अतिशयितं साधकं साधकतमं यस्मिन् सत्यविलं
बेन ज्ञानमुत्पद्यते तदतिशयितमित्युच्यते तेन प्रमाकरणं प्रमाणमिति सिद्धं अन
धिगतार्थगंतृ प्रमाणमित्यादिकं तु तदसद्वादिभिरेव निरस्तत्वादनादरणीयं तानि
त्य. प्रमाणानि प्रत्यक्षानुमानशब्दाख्यानि त्रीणि अत्र साक्षात्कारिप्रकरणं प्रत्यक्षं अनु ना
मानादिव्यावृत्त्यर्थं साक्षात्कारि इति दुष्टेंद्रियजन्यव्यावृत्त्यर्थं प्रमेति तच्च प्रत्यक्षं द्विविधं प्रमाणं गतम्
निर्विकल्पकसविकल्पकभेदात् तत्र निर्विकल्पकं नाम जातिगुणसंख्यादिविशेषप्रथमपिंडग्र

तुर्यौ तु साहचर्यो र्देवदत्तयज्ञदत्तयोर्मध्ये अन्यतरदर्शनेनान्यतरस्मृतिः सम्यक्पूर्व
मनुभूतस्य सर्वस्य स्मृतिविषयत्वनियमः क्वचित्कालदैर्घ्या व्याधिना वा संस्कारप्र
३ त्य मोषात्स्मृत्यभावः यथा स्मृतेः प्रध्वंसाभावः तथा सोऽयं देवदत्त इति प्रत्यभिज्ञायामपि प्र
ध्वंसाभावः अस्मत्स्मृतेः भावस्य भावांतररूपत्वात् तज्ज्ञानस्यापि प्रध्वंसाभावः भूतत्वेन घ
4 टात्यंताभावो भूतत्वमेव घटप्रागभावो नाम मृद् एवं घटध्वंसश्च कपालमेवेत्याद्यः पुरुषे
णानेन भवितव्यमेतद्रूहः संशयजन्तः एतयोरपि प्रध्वंसाभावः उत्पपुरुषनिष्ठप्रतिभा
दिप्रध्वंसाभावो गतास्मृत सर्वं विज्ञानं यथार्थमिति वेदांतविदां मतमित्युक्तत्वात् भ्रमादिषू
त्पन्नज्ञानं यथार्थमेव अख्यात्यात्मख्यात्यनिर्वचनीयख्यात्यन्यथाख्यात्यसत्ख्याति
वादिनो निरस्य सत्ख्यातिपक्षस्वीकारात् सत्ख्यातिनो मज्ञानविषयस्य सत्यत्वं तर्हि

नेममेत्युल्लेखं च स्मृतेश्चापि प्रमा। वक्षितव्यवहारानुगुणत्वेन प्रामाण्यात् स्मृतेरपि
प्रमाणत्वेन परिगणनान्नाश्चर्यत्वेन प्रमाणानि कथं प्रतिपाद्यंत इति चेत् उच्यते स्मृतेः
प्रामाण्यांगीकारेपि संस्कारसापेक्षत्वात् तस्य प्रत्यक्षमूलत्वम् तत्वात् तत्पक्षे तेभवतिन
त४ पृथक् प्रमाणत्वकल्पनं अग्रे स्त्री ऐक्येवेति संभवति स्मृतिर्नामपूर्वानुभवजन्यो सं पु४
स्कारमात्रजन्यं ज्ञानं संस्कारोद्बोधश्च सदृशादृष्टचिंताद्याः स्मृतिबीजस्य बोध
७४ कादित्युक्तं कारेण क्वचित्सदृशदर्शनाद्भवति क्वचिददृष्टात् क्वचिच्चिंतया ग्रामादिश
ब्देन साहचर्यस्यापि ग्रहणान्नापि भवति साहचर्यं जायपद्याद्देवदत्त यज्ञदत्तयोः देवदत्तदर्श
नेन यज्ञदत्तस्मृतिः इति पापप्रयापादृष्टिकास[illegible] कालांतरानुभूत श्रीरंगादिदिव्य
देशस्मृतिः ततो पापप्रायश्चित्त्यमाने सति श्रीवेंकटेशस्य कमनीयदिव्यमंगलविग्रहस्मृतिश्च

५ णादिदोषराहित्ये पूर्वं तन्निजमुखादि गृह्णाति तत्राप्यातिशोच्यादितरात्मग्रहणात्सर्वाप्रतीतिरिति चेद्दृ
ष्टान्तस्य वैपरीत्यं गुल्मवत् भ्रान्तिमिरादिभिर्न्यूनतेजोगतिभेदेन सामग्रीभेदात्सामग्रीरूप
मस्येत्यस्य निरपेक्षं चेद्ग्रहणाग्रहणे भवति सामग्रीरूपपारमार्थिकेतेन इदं चेद्दृज्ञानं भवति
अतः सर्वज्ञानं सत्यं सविशेषविषयं च निर्विशेषवस्तुनोऽग्रहणात् एवंभूतं प्रत्यक्षं भेदं गृह्णा १
ति भेदस्तु व्यवहारे तु प्रतियोग्यपेक्षा न तु स्वरूपे तेनानवस्थान्योन्याश्रयदोषोऽपि नास्ति
रूपवस्तुप्रत्यपेक्षानवस्था परस्परापेक्षा अन्योन्याश्रयः ननु दशमस्त्वमसीत्येतदपि
प्रत्यक्षं किं न स्यादिति चेन्न तत्त्वमित्येतस्य प्रत्यक्षत्वेऽपि दशमोहमित्यस्य वाक्यजन्य
त्वात् यदि हि दशमोहमित्यस्य प्रत्यक्षविषयत्वं तर्हि एवमेवात्त्वमसीत्येतस्यापि प्रत्य
क्षत्वं स्यादंगीकारे इति प्रसंगाद्देहत्वं त्वमसीति वाक्यस्य नामपरोक्षज्ञानजनकत्वं ए
२ कर तेन प्रत्यक्षप्रमाणं प्रमाणप्रमा चात्मचैतन्यमेव चैतन्यं च त्रिविधमतः करणा
वच्छिन्नचैतन्यं वृत्त्यवच्छिन्नचैतन्यं विषयावच्छिन्नचैतन्यं चेति पदात्रयाणामे २

न तत्र रथा न रथयोगा न पंथानो भवंति । अथ रथान्रथयोगान्पथः सृजते स हि विश्वस्य कर्त्ता

भ्रमत्वं कथमिति चेद् द्विप्रपञ्चव्यवहारबाधात् ... भ्रमत्वं तदुपपादयामः पंचीकरणप्रक्रिय
या पृथिव्यादिषु सर्वत्र सर्वभूतानां विद्यमानत्वात् अतएव शुक्तिकादौ रजतांशस्य विद्यमान
त्वात्तद्भानं भ्रमः शुक्त्यंशाप्रत्यक्षज्ञानात् भ्रमनिवृत्तिः स्वप्नादिज्ञानं तु सत्यमेव तत्तत्पुरुषा
नुभवितव्यतया तत्तत्कालावसानान्रथादीन्परमपुरुषः सृजतीति श्रुत्यावगम्यते पित्तः शं
खादौ नयनवर्त्तिपित्तद्रव्यसंभिन्ना नयनरश्मयः शंखादिभिः सह संयुज्यंते तत्र पित्तगत
पीतिमाभिभूतशंखगतशुक्लिमा न गृह्यते अतः सुवर्णानुलिप्तशंखवत्पीतः शंख इति प्रतीयते
सूक्ष्मत्वात्पीतिमा स्वनयननिष्क्रांततया स्वेन न गृह्यते नत्वन्यैः जपाकुसुमसमीपवर्त्तिस्फटिक
मणिरपि तत्प्रभाभिभूततया रक्त इति गृह्यते तद्ज्ञानं सत्यमेव मरीचिकायां जलज्ञानमपि
पंचीकरणप्रक्रियया पूर्ववदेवोपपद्यते पंचीकरणप्रक्रिया तु उत्तरत्र वक्ष्यते दिग्भ्रमोपि
तथैव दक्षिणादिदिगंतरस्यापि विद्यमानत्वात् अवच्छेदकभेदेन द्योतति दूरस्थांतराले नीकाराच्चाला
तचक्रादौ तु शैघ्र्यादंतरालाग्रहणात्तत्तद्देशसंयुक्तत्वेन वस्तुन एव चक्राकारेण ग्रहणं तदपि सत्यं
दर्पणादिषु निजमुखादिप्रतीतिरपि प्रत्यक्षमेव ... नयनरश्मयो दर्प

६ श्रीनिवासदासेन विरचितायां यतीन्द्रमतदीपिकायां प्रत्यक्षनिरूपणं नाम प्रथमोऽवता-
रः॥१॥ अथानुमानं निरूप्यते व्याप्यस्य व्याप्यत्वानुसंधानात् व्यापकविशेषप्रमि-
तिरनुमितिः तत्करणमनुमानं व्याप्यस्य धूमस्याग्निव्याप्यत्वानुसंधाना-
त् व्यापकविशेषप्रमितिर्वह्निप्रमितिरनधिकदेशकालनियतं व्याप्य-
मन्यूनदेशकालवृत्ति व्यापकं तदिदमविनाभूतं तेन व्याप्यं तद्वृत्तिसंबंधि
व्यापकमिति तेन निरुपाधिकतया नियतसंबंधो व्याप्तिरस्तु यथेकेषं
भूयो४ यत्र धूमस्तत्र वह्निरिति व्याप्तिर्भूयोदर्शनाद्गृह्यते व्याप्तिर्द्विविधा अन्व-
यव्यतिरेकभेदात् साधनविधौ साध्यविधिरूपेणान्वय॰ तान्वाप्तिरन्वयव्याप्तिर्यथा
यो धूमवान् सोऽग्निमानिति साध्यनिषेधे साधननिषेधरूपेण व्यतिरेकव्याप्तिर्व्यतिरेकव्या-
प्तिर्यथा योऽनग्निः सोऽनिर्धूम इति स्वयमनुमेयविदां व्याप्तिनिरूपाधिकं भवेऽप्यवेतत् रम ६

कालदासस्साक्षात्कारः सोपि निर्विशेषविषयकत्वमभेदमेव गृह्णातीत्यादिकं दूषितकल्पनानि
रस्तानि विकल्पकं तु नामजात्यादियोजनाहीनं वस्तुमात्रावगाहि किंचिदिदमित्या
दिवैयापकोक्तमेव निरस्तं ननु काणादं पाणिनीयं च सर्वं शास्त्रं प्रकारं किमित्युक्तत्या
त्केषांमतमतनिरासइतिचेदुच्यते न कदाचित्काणादस्य मतस्य निरासः क्रिय
ते यावदिह युक्तियुक्तं तावत्स्वीक्रियते परकल्पितं तत्तत्कोपजीवनं न खल्वनुत
पाकस्यपंकोपि स्वीक्रियते अतः परमाणुकारणत्ववेदपौरुषेयत्वेश्वरानुमानिकत्व
जीवविभुत्वसामान्यसमवायविशेषाणां पदार्थत्वेन स्वीकारः उपमानादेः पृथक्
प्रमाणत्वकल्पनं संख्यापरिमाणपृथक्त्वपरत्वापरत्वगुरुत्वद्रवत्वादीनां पृथग्गुणत्वक
ल्पनं दिशोपि द्रव्यत्वकल्पनमित्यादि स्वतन्त्रकार्योद्धिनिरुद्धा प्रक्रिया नास्माभिः स्वीक्री
यते इति न विरोध इति श्रीबाधूलकुलतिलकश्रीमन्महाचार्यस्य प्रथमदासेन

व्यापकत्वं सपक्षे सत्त्वं विपक्षाद्व्यावृत्तिः अबाधितविषयत्वम् असत्प्रतिपक्षत्वं चेति । सिसा
धयिषितधर्मविशिष्टो धर्मी पक्षः यथा अग्निमत्त्वादिसाधने पर्वतादिः । सिसाधयिषित
सजातीयधर्मवान् सपक्षः यथा महानसादिः साध्यतज्जातीयशून्यो विपक्षः यथा महाह्र ८२
दादिः प्रबलेन प्रमाणेन पक्षे निश्चितसाध्याभावकत्वं बाधितविषयत्वं यथा महाह्रदो वह्नि
मानित्यादि तदभाववत्त्वम् अबाधितविषयत्वं समबलतया प्रतिपक्षानुमानप्रमाणेन प्रतिरोधा
भावो सत्प्रतिपक्षत्वं एवंभूतं व्याप्यं द्विविधं अन्वयव्यतिरेकि केवलान्वयि भेदात् । तत्र
पंचरूपोपपन्नं व्याप्यं अन्वयव्यतिरेकि यथा पर्वतोऽग्निमान् धूमवत्त्वात् यो यो
धूमवान् स सोऽग्निमान् यथा महानसः यो न वह्निमान् स न धूमवान् यथा महाह्रद इति तादृशमेव वि
पक्षरहितव्याप्यं केवलान्वयी यथा ब्रह्मशब्दवाच्यं वस्तुत्वात् घटवत् विपक्षाभावा
त्केवलान्वयि चतूरूपोपपन्नं केवलव्यतिरेकि साध्याप्रसिद्धेः तद्व्यतिरेकव्या

ध्यव्यापकत्वे सति साधनाव्यापक उपाधिर्यथा वह्निना धूमे साध्यमाने आर्द्रेंधनो-
उपाधिः मैत्रीतनयत्वेन श्यामत्वे साध्यमाने शाकपाकजत्वमुपाधिः स चो-
पाधिर्द्विविधः निश्चितः शंकितश्चेति निश्चितो यथा विप्रतिपन्ना सेवा दुःख-
हेतुः सेवात्वात् राजसेवावत् इत्यत्र पापारब्धत्वमुपाधिः इयं चेश्वरसेवायां
नास्तीति निश्चयादयं निश्चितोपाधिः शंकितो यथा विप्रतिपन्नो जीवः एत-
द्देहावसाने मुक्तिमान् निष्पन्नसमाधित्वात् शुकादिवत् इत्यत्र कर्मात्यन्तपरि-
क्षय उपाधिः स च निष्पन्नसमाधौ जीवेऽस्ति नास्तीति संदिग्धत्वात् शंकितोपाधिर-
३।२ तो निरुपाधिकसंबंधो व्याप्तिरिति सिद्धं व्याप्यं साधनं लिंगमिति नामांतरं स्व- तर
रूपे अनुमित्यंगमेतस्य पक्षधर्मता चेति पंचरूपाणि संति तानि च पक्ष-

नयम्रूपावयवद्वयवादिनः सौगताः अस्माकं तु नियमः क्वचित्पंचावयवः क्वचि
त्त्र्यवयवः क्वचिद्व्यवयवः उदाहरणोपनयाभ्यामेव व्याप्तिपक्षधर्मतयोः सिद्धत्वात् ताव
तैव अनुमित्युपपत्तेश्च मन्दमध्यकठोरधियां विस्तरसंग्रहाभ्यां व्यवहार उपपद्यते इ
त्यनियमः एवं पंचावयवसंपुटः सद्धेतुरेव वक्ष्यमाणपक्षः सद्धेतुरित्युक्तत्वात् ध
मसद्धेत्वाधः लौयटलौत्ययापदिष्टभेदेन पंचप्रकारः तत्रासिद्धस्त्रिविधः स्वसंसिद्धः आ
श्रयासिद्धः व्याप्यत्वासिद्धश्चेति स्वरूपासिद्धो यथा अनित्यो जीवः चाक्षुषत्वात् घटवदि
ति आश्रयासिद्धस्तु व्योमारविंदं सुरभि अरविंदत्वात् सरोजारविंदवत् व्योमारविंदमाश्रयः
स चासिद्धः व्याप्यत्वासिद्धो द्विविधः एको व्याप्तिग्राहकप्रमाणाभावात् अपरस्तूपाधिसद्भा
वात् आद्यो यथा यत्सत्तत् क्षणिकमिति क्षणिकत्वे व्याप्तिग्राहकप्रमाणासिद्धेः द्वितीयो य
था अग्नीषोमीयहिंसा अधर्मसाधिका हिंसात्वात् क्रतुबाह्यहिंसावदित्यत्र निषिद्धत्वमुपाधिः

पर

लिंगस्य वचनं हेतुः यथा धूमादिति व्याप्तिनिदेशपूर्वकं दृष्टान्तवचनमुदाहरणं न द्विविधं अन्वयव्यतिरेकभेदात्
यथा यो यो धूमवान् स सोऽग्निमान् यथा महानस इत्यन्वयोदाहरणं यो नाग्निः स निर्धूमः इति व्यतिरेकोदाहरणं
ह्रदं दुःखेहा अतः केवलव्यतिरेकिनिरासः केवलान्वयिन्यन्वयव्यतिरेकिणा चात्यन्ततो द्वि
पार्थगोचरता निरस्ता तदेतदनुमानं स्वार्थं परार्थं चेति द्विधा विभज्य केचिदाहुः सर्वेषा
दवितं २ मनुमानानां स्वप्रतिसंधानं येन प्रवृत्ततया स्वव्यवहारमात्रहेतुत्वमिति स्वार्थानु
मानमेवेत्यपरे तदनुमानबोधकवाक्यं प्रतिज्ञाहेतूदाहरणोपनयनिगमनरूपपञ्चा
१ वयवसंयुक्तं तत्र पक्षवचनं प्रतिज्ञा यथा पर्वतोऽग्निमान् यथा महानस इति दृष्टान्तनिर्दे
शेन व्याप्ततया पक्षे हेतूपसंहारवाक्यमुपनयः सोऽपि द्विविधः अन्वयव्यतिरेकभेदा
त् तथा च धूमवानित्यन्वयोपनयः अपञ्च न तथा निर्धूम इति व्यतिरेकोपनयः हेतुपूर्व
कं पक्षे साध्योपसंहारवाक्यं निगमनं तदपि द्विविधमेव यथा तस्मादग्निमानि
त्यन्वयेन निगमनं तस्मादपि निरग्निर्न भवतीति व्यतिरेकेण। रावपञ्चावयववादि
नो नैयायिकाः प्रतिज्ञाहेतूदाहरणरूपत्र्यवयववादिनो मीमांसकाः उदाहरणोप